## **श्री गुरुचरणकमलेभ्यो नमः**

## कोजागिरि पौर्णिमा सधनाऐं

मंत्र: || ॐ श्रीं ह्रीं श्रीं  कमले  कमलालये प्रसीद प्रसीद श्रीं ह्रीं  श्रीं ॐ महालक्ष्म्यै नमः ||

विधान:- साधक या साधिकाये ,पूर्व दिशा के ओर बैठे और सामने गुरु चित्र और लक्ष्मी चित्र या विग्रह लगाकर पंचोपचार का पूजन कर साधना आरंभ करे |

जप संख्या :- 21 माला

इसके बाद इंद्राक्षी स्तोत्र-21 पाठ करे |

## इन्द्राक्षी स्तोत्र - इच्छित फल प्राप्ती हेतु

ध्यान:

इन्द्राक्षी द्विभुजा देवी पीतवस्त्रसमन्विताम् ।
वामहस्ते वज्रधरां दक्षिणे च वरप्रदाम् ॥
इन्द्राक्षी नाम साज्योतिर्नाना रत्नविभूषिताम् ।
प्रसन्नवदनाम्भोजामप्सरोगण सेविताम् ॥

स्तोत्र:

इन्द्र उवाच

इन्द्राक्षी नाम सा देवी दैवैश्चः समुदाहृता ।
गौरी शाकम्भरी देवी दुर्गा नाम्नाऽतिविश्रुता ॥
कात्यायनी महादेवी चन्द्रघण्टा महातपा ।
गायत्री सा च सावित्री ब्राह्मणी ब्रह्मवादिनी ॥
नारायणी भद्रकाली रुद्राणी कृष्णपिंगला ।
अग्निज्वाला रौद्रमुखी कालरात्रि तपस्विनी ॥
मेघश्यामा सहस्त्राक्षी विष्णु माया जलोदरी ।
महोदरी मुक्तकेशी घोररूपा महाबला ॥
अच्युता भद्रा नन्दा रोगहन्त्री शिवप्रिया ।
शिवदूती कराली च प्रत्यक्षा परमेश्वरी ॥
महिषासुरहन्त्री च चामुण्डा सप्तमातरः ।
इन्द्राणी चन्द्ररूपा च रुद्रशक्तिः परायणा ॥
शिवा च शिवरूपा च शिवशक्ति परायणा ।
सदा सम्मोहिनी देवी सुन्दरी भुवनेश्वरी ॥
आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ।
वाराही नारसिंही च भीमा भैरवनादिनी ॥
श्रुतिः स्मृतिर्धृतिर्मेधा विद्या लक्ष्मी सरस्वती ।
अनन्ता विजया पूर्णा मानस्तोकापराजीता ॥
भवानी पार्वती दुर्गा हेमवत्यम्बिका शिवा ।
शिवा भवानी रुद्राणि शंकरार्द्ध शरीरिणी ॥
मृत्युंजया महामाया सर्वरोग प्रनाशिनी ।
ऐरावतगजारूढा भूषिता कंकणप्रभा ॥
एतैर्नामभिर्दैव्यैः स्तुता शक्रेण धीमता ।
शतमावर्तते यस्तु मुच्यते व्याधिबन्धनात् ॥
आवर्तयेत्सहस्त्रं यो लभते वांछितं फलम् ।
इन्द्रेण कथितं स्तोत्रं सत्यमेव न् संशयः ॥

॥ इति श्री इन्द्राक्षीस्तोत्रं सम्पूर्णम् ॥

स्तोत्र पाठ: **21 बार**